**क्रन्द्** 1 P. ( क्रन्दति, चक्रन्द, अक्रन्दीत्, क्रन्दित ) 1 To cry, weep, shed tears; किं क्रन्दसि दुराक्रन्द स्वपक्षक्षयकारक Pt. 4. 29; क्रन्दत्यतः करुणमप्सरसां गणोऽयम् V. 1. 3; चक्रन्द विग्ना कुररीव भूयः R. 14. 68; 15. 42; Bk. 3. 28, 5. 5. –2 To call out to, call out piteously to any one, ( with acc. ); क्रन्दत्यविरतं सोऽथ भ्रातृमातृसुतानथ Mārk. P. –3 To cry out, exclaim. –4 To yell, howl. –5 To neigh ( as a horse ); हरिर्वाजिमाचिक्रन्दत् Rv. 9. 67. 4. –6 To roar. –7 To creak ( as a wheel ). –10 P. or –*Caus.* 1 To cry out continuously. –2 To roar, rave. –3 To cause to weep.

**क्रन्दः** Ved. 1 Neighing; अश्वस्येव वृषणः क्रन्द एति Av. 11. 2. 22. –2 A cry, calling out; क्रन्दाय ते प्राणाय Av.11. 2.3.

**क्रन्दन** [ क्रन्द् भावे ल्युट् ] A cat. **–नम्** 1 A cry of distress or weeping, lamentation; व्यसनं प्राप्य यो मोहात्केवलं परिदेवयेत्। क्रन्दनं वर्धयत्येव Pt. 2. 188. –2 Mutual defiance. –3 Calling, inviting.

**क्रन्दस्** *n.* Ved. Battle-cry; शिमीवति क्रन्दसि प्राव सातये Rv. 10. 38. 1.

**क्रन्दित** *a.* [ क्रन्द्-क्त ] Wept, called or cried out; ततस्तद्वासिभिर्देवैः क्रन्दितः शरणार्थिभिः Ks. 114. 120. **–तम्** 1 Cry of distress or weeping, lamentation; हा तातेति क्रन्दितमाकर्ण्य विषण्णः R. 9. 75. –2 Mutual defiance, challenge.

**क्रप्** 1 Ā. ( क्रपते ) 1 To pity. –2 To mourn. –3 To lament. –4 To go. –5 To long for, desire.

**क्रप्** 10 P. ( क्रापयति ) To speak clearly.

**क्रम्** 1 U., 4. P. ( क्रामति, क्रमते, क्राम्यति, चक्राम, चक्रमे, अक्रमीत्, अक्रस्त, क्रान्त ) 1 To walk, step, go; क्रामत्यनुदिते सूर्ये वाली व्यपगतक्लमः Rām.; गम्यमानं न तेनासीदगतं क्रामता पुरः Bk. 8. 2; 25. –2 To go to, approach ( with acc.); देवा इमान् लोकानक्रमन्त Śat. Br. –3 To pass or go over, go across, traverse; U. 2. 13; सुखं योजनपञ्चाशत्क्रमेयम् Rām. –4 To leap, jump; कर्म बबन्ध क्रमितुं सकोपः ( हरिः ) Bk. 2. 9. 5. 51. –5 To go up, ascend; क्रामत्युच्चैर्भूभृतो यस्य तेजः Śi. 16. 83. –6 ( *a* ) To cover, occupy, take possession of, fill; कान्ता यथा चेतसि विस्मयेन R. 14. 17. (*b*) To reach up to, pervade, penetrate; क्रामद्भिर्घनपदवीमनेकसंख्यैः Ki. 5. 34. –7 To surpass, excel; स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना R.1. 14. –8 To undertake, strive after, be able or competent for, show energy for ( with dat. or inf. ); व्याकरणाध्ययनाय क्रमते Sk; धर्माय क्रमते साधुः Vop; व्युत्पत्तिरावर्जितकोविदापि न रञ्जनाय क्रमते जडानाम् Vikr. 1. 16; हत्वा रक्षांसि लवितुमक्रमीन्मारुतिः पुनः। अशोकवनिकामेव Bk. 9. 23. –9 To be developed or increased, to have full scope, be at home ( with loc. ); कृत्येषु क्रमन्ते Dk. 170; क्रमन्तेऽस्मिञ्शास्त्राणि, or ऋक्षु क्रमते बुद्धिः Sk. क्रममाणोऽरिसंसदि Bk. 8. 22. –10 To succeed, have effect ( Atm. ); न चक्रमस्याक्रमताधिकं धरम् Śi. 1. 54. –11 To be repeated (as a letter or word in the arrangement called क्रम q. v.). –12 To fulfil, accomplish. –13 To have sexual intercourse with; to cover ( in copulation ); क्रमस्पर्श इव रोहितमनवग्लायता सदा Av. 4. 4. 7. ( By वृत्तिसर्गतायनेषु क्रमः P. I. 3. 38; क्रम् by itself is used in the Ātm. in the sense of 'continuity' or 'want of interruption', 'energy or application', and 'development or increase', and also 'conquering or getting over.) –*Caus.* ( क्रमयति, क्रामयति ) 1 To cause to go &c. –2 To repeat a letter ( as in the क्रम arrangement ). –*Desid.* चिक्रमिषति, चिक्रंसते &c.

**क्रमः** [ क्रम्-भावकरणादौ घञ् ] 1 A step, pace; त्रिविक्रमः; सागरः प्लवगेन्द्रेण क्रमेणैकेन लङ्घितः Mb.; Śi. 12. 18. –2 A foot; ( अपनेष्यति ) असुरेभ्यः श्रियं दीप्तां विष्णुस्त्रिभिरिव क्रमैः Rām. 5. 21. 28. –3 Going, proceeding, course; क्रमात् or क्रमेण in course of, gradually; कालक्रमेण gradually,in course of time; कालक्रमेण जगतः परिवर्तमाना Svapna., भाग्यक्रमः course or turn of fate; R. 3. 7, 30, 32.–4 Performance, commencement; अविचार्य कर्म न करिष्यति। इत्थमत्र विततक्रमे क्रतौ Śi. 14. 53.–5 (*a*) Regular course, order, series, succession; निमित्तनैमित्तकयोरयं क्रमः Ś. 7. 30; Ms. 7. 24, 9. 85, 2. 173, 3. 69. ( *b* ) Traditional order; U. 6. ( *c* ) Order of propriety; लोकान्तरगतेनापि नोज्झितो विनयक्रमः Nāg. 5. 11. आत्मीयः पर इत्ययं खलु कुतः सत्यं कृपायाः क्रमः। *ibid.* 5. 20; Ku. 5. 32; प्रियवचननिवेदनत्वरया क्रमविशेषो नावेक्षितः Pratijñā. –6 Method, manner; वर्तस्व च सतां क्रमे Rām. 2. 25. 2; नेत्रक्रमेणोपरुरोध सूर्यम् R. 7. 39. –7 Grasp, hold; क्रमगता पशोः कन्यका Māl. 3.13. –8 A position of attack ( assumed by an animal before making a spring ); न मया क्रमः सज्जीकृत आसीत् Pt. 4. –9 Preparation, readiness; Bk. 2. 9. –10 An undertaking, enterprize. –11 An act or deed, manner of proceeding; कोऽप्येष कान्तः क्रमः Amaru. 48, 33. –12 Particular manner of reciting Vedic texts, leaving at each time one word and taking up another; वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः Bhāg. 12. 13. 1. चर्चागुणान् क्रमगुणांश्चापेक्ष्य भवति Mbh. on P. V. 1. 119. –13 Power, strength; स ईश्वरः काल उरुक्रमोऽसौ Bhāg. 7. 8. 9. –14 N. of Viṣṇu. –**Comp.** **–अनुसारः, अन्वयः** regular order, due arrangement. **–आगत, –आयात** *a.* descended or inherited lineally, hereditary; क्रमायातोऽपि भूपतिः Pt. 1. 73, 84; 3. 167... त्यक्तैश्वर्यं क्रमागतम् Nāg. 1. 4. **–उद्वेगः** an ox. **–ज्यका, –ज्या** the sine of a planet declination. **–पाठः** the Krama reading. **–भङ्गः** irregularity, **–भाविन्** successive. **–माला –रथः –लेखा –शठः –शिखा** various kinds of क्रमपाठ. **–योगः** succession, order; Ms. 1. 42. **–योगेन** *ind.* in regular manner; तेनैव क्रमयोगेन जिज्ञासुः पर्यपृच्छत Mb.1.132.78.

**क्रमक** *a.* 1 Orderly, methodical. –2 Going, proceeding, **–कः** A student who goes through a regular course of study. –2 One who knows the Krama arrangement of a text.

**क्रमणः** [ क्रामत्यनेन करणे ल्युट् ] 1 The foot. –2 A horse. **–णम्** 1 A step, Y. 1. 188. –2 Walking; यो वामृजवे क्रमणाय रोदसी Rv. 6. 70. 3. –3 Proceeding. –4 Transgressing. –5 Treatment of words or letters according to the Krama arrangement; Rv. Pr. 14.

**क्रमतः** *ind.* Gradually, successively.